# संस्कृत-वार्ता:

दिनाङ्कः-29.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी मुम्बै-नगरे समुद्रीयनेतृणां सम्मेलनम् सम्बोधयति; वैश्विक-सङ्घर्षस्य मध्ये भारतम् सामरिक-स्वायत्ततायाः, शान्तेः, समावेशी-विकासस्य च प्रतीकरूपेण वर्तते इति कथयति प्रधानमन्त्री ।
- राष्ट्रपतिः द्रौपदी मुर्मू अम्बाला-नगरे राफ़ेल्-युद्धविमाने उड्डयनं अकरोत् ।
- भारत-चीन-देशौ सीमा-विषयान् परिहर्तुं, स्थिरतां धारयितुं च विद्यमानमार्गाणां उपयोगम् अनुवर्तयितुं सहमतौ स्तः।
- छठ्-उत्सवानन्तरं बिहार-विधानसभा-निर्वाचनस्य कृते सङ्घर्षः तीव्रः भवति; एन्. डी. ए. अथ महाघटबन्धन् इत्येतयोः प्रमुखाः नेतारः सभां कुर्वन्तः सन्ति ।
- मोन्था-चक्रवातः आन्ध्रप्रदेशस्य तटीयप्रदेशे, समीपस्थे तेलङ्गाना-प्रदेशे च तीव्र-अवसादरूपेण दुर्बलः भवति ।

---

PM-Maritime सप्ताहः

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत्, समुद्रीयक्षेत्रं भारतस्य विकासस्य चालकः अस्ति । सः अवदत् यत्, गतदशके अस्मिन् क्षेत्रे महत्त्वपूर्णपरिवर्तनं जातम्, येन व्यापारस्य, नौकाश्रयस्य मूलसौकर्याणां च वृद्धिः अभवत् । श्रीमोदी अद्य सायङ्काले मुम्बई-नगरस्य नेस्को इति प्रदर्शनी-केन्द्रे इण्डिया-मारिटैम्-वीक्-2025 इत्यस्य अन्तर्गतं आयोजिते मारिटैम्-लीडर्-कान्क्लेव् इत्येतं सम्बोधयन् आसीत् । सः अवदत् यत्, भारतस्य समुद्रीयक्षेत्रं महता वेगेन ऊर्जया

च प्रगतिं कुर्वद् अस्ति। प्रधानमन्त्री अवदत् यत्, अद्य भारतस्य नौकाश्रयाः विकासशीलराष्ट्रेषु सर्वाधिक-दक्षतया गण्यन्ते । सः अवदत् यत्, अनेकेषु विषयेषु ते विकसितविश्वस्य अपेक्षया अपि उत्तमं प्रदर्शनं कुर्वन्तः सन्ति। सः अधोरेखितवान् यत्, यदा वैश्विक-सागराः रुक्षाः भवन्ति तदा संसारः स्थिर-दीपगृहम् अन्विष्यति । सः अवदत् यत्, भारतदेशः शक्त्या स्थिरतया च तत् पात्रं निर्वोढुं सुसज्जः अस्ति। प्रधानमंत्रीः अवदत् यत्, भारतदेशः नौकायान-निर्माणक्षेत्रे नूतनानि औन्नत्यानि प्राप्तुं प्रयत्नान् त्वरितगत्या कुर्वन् अस्ति । प्रधानमन्त्री अवदत् यत्, सर्वकारेण एकशताब्देः पुरातनाः औपनिवेशिक-नौवहन-नियमाः एकविंशति-शताब्देः उपयुक्तैः आधुनिकैः, भविष्यकालीनैः नियमैः च सह परिवर्त्य पुनः स्थापिताः सन्ति।

---------------------------------------------

## राष्ट्रपति-राफेलयात्रा

राष्ट्रपति-द्रौपदी-मुर्मू-वर्या अद्य हरियाणायाः अंबालाक्षेत्रे स्थितात् वायुसेना-विमानस्थात्रात् राफेल इति युद्धक-विमानेन यात्रां कृतवती । इयं यात्रा पञ्चविंशति-निमेषात्मिकी आसीत् । अद्य प्रातः वायुसेना-स्थात्रं सम्प्राप्य राष्ट्रपतिवर्या औपचारिकरूपेण गार्ड-ऑफ-ऑनर इति सम्मानम् अध्यगच्छत् । इत पूर्वं तस्याः स्वागतसत्कारं वायुसेनाप्रमुखः अमरप्रीत-सिंहः, हरियाणासंसदः मंत्री अनिलविजः, अंबालायाः उपायुक्तः अजय-सिंह-तोमरः अन्ये अधिकारिणः च अकुर्वन् ।

---------------------------------------------

## भारत-चीनोपवेशनम्

भारत-चीनौ सीमाक्षेत्रेषु कीदृशमपि भौगोलिकं विषयं समाधातुं स्थैर्यं प्रतिष्ठापितुं च वार्तमानिकतंत्राणाम् उपयोगं यथापूर्वं कर्तुं सहमतौ अभवताम् । एषः निर्णयः अस्य मासस्य पञ्चविंशति-दिनाङ्के चुशुल-मोल्दो-सीमोपवेशन-स्थले आयोजिते भारत-चीनयोः सैन्याधिकारिस्तरीये त्रयोविंशतितमे उपवेशने स्वीकृतः अस्ति । विदेश-मंत्रालयः एकस्मिन्

वक्तव्ये प्रोक्तवान् यत् उपवेशनावधौ द्वावेव पक्षौ अस्मिन् वक्तव्ये साहमत्यं प्रकटितवन्तौ यत् तयोः सीमावर्ति-क्षेत्रेषु शांतिः सौहार्दं च सुनिश्चितं कृतम् अस्ति । मंत्रालयानुसारं,एषा वार्ता मैत्रीपूर्णे सौहार्दपूर्णे च वातावरणे जाता। विशिष्ट-प्रतिनिधीनां वार्तायाः चतुर्विंशतितमस्य चक्रस्य अनन्तरं पश्चिमक्षेत्रे प्रमुख-स्तरीय-वार्तायाः इदं प्रथमोपवेशनम् आसीत् । मंत्रालयः अकथयत् यत् द्वावेव देशौ विगतवर्षे अक्टूबरमासे आयोजितस्य सैन्याधिकारिस्तरीयोपवेशनस्य द्वाविंशतितमस्य उपवेशनस्य अनन्तरं जातायां प्रगतौ ध्यानं प्रायच्छताम् ।

---------------------------------------------

## बिहार-निर्वाचनम्

छठ इत्यस्य अवकाशानन्तरं बिहार-विधानसभा-निर्वाचनस्य प्रचाराभियानम् तीव्रतां भजते। एन्. डी. ए. अथ महाघटबन्धन इत्येते घटकदले परस्परम् आरोपं कुर्वन्तः मतदातॄन् आकर्षयितुं सर्वविध-प्रयत्नान् कुर्वती स्तः। ह्यः प्रकाशितस्य महाघटबन्धन् इत्यस्य घोषणा-पत्रस्योपरि आक्षेपं कुर्वन्ती, भाजपेति दलस्य नेत्री केन्द्रीयमन्त्री अन्नपूर्णा देवी पटना-नगरे उक्तवती यत्, बिहारस्य जनाः पूर्वमेव महाघटबन्धन् इत्यस्य कार्यं दृष्टवन्तः, पुनः न भ्रमिताः भविष्यन्तीति।

अपरपक्षतः महाघटबन्धन् इत्यस्य मुख्यमन्त्रीपदस्य अभ्यर्थिभूतः आर्. जे. डीति दलस्य नेता तेजस्वी यादवः अवदत् यत्, घोषणापत्रे कृताः घोषणाः प्रतिज्ञाः सन्तीति।

[तेजस्वी यादव]

भाजपा-पक्षस्य वरिष्ठः नेता केन्द्रीयमन्त्री च श्री-अमितशाहः, दर्भङ्गा-नगरस्य अलिपुरक्षेत्रे निर्वाचनसमारोहं सम्बोधयन् अवदत् यत् एन्. डी. ए-सर्वकारः मधुबनी-चित्रकलायाः विभिन्नेषु अन्ताराष्ट्रिय-मञ्चेषु प्रचारं कृत्वा वैश्विक-मान्यतां प्रापितवानिति।केन्द्रीयमन्त्री तथा भाजपा-पक्षस्य वरिष्ठः नेता च राजनाथसिंहः दर्भङ्गा-नगरस्य हयाघाटक्षेत्रे जनसभाम् अभिसंबोधयन् अवदत् यत् राष्ट्रिय-जनता-दलम्, काङ्ग्रेसदलञ्च सुशासनस्य प्रतिज्ञां कुर्वन्तः सन्ति, परन्तु तेषाम् विषये केनापि विश्वासः नैव करणीयः।ए. आई. एम्. आई. एम्. प्रमुखः असदुद्दीन् ओवैसी इत्येषः

किशनगञ्ज्-नगरस्य बहादुर्गञ्जक्षेत्रे जनसभां सम्बोधयन् अवदत् यत् तस्य दलं निकषा सीमाञ्चल्-प्रदेशस्य विकासाय मार्गचित्रम् अस्तीति। यदि तस्य दलाय अस्य क्षेत्रस्य प्रतिनिधित्वावसरः प्राप्यते चेत् जलप्लावनस्य समस्यायाः समाधानकार्यं भविष्यतीति ओवैसी अवदत्।

---------------------------------------------

<u>आन्ध्राप्रदेश्-सैक्लोन्ः</u>

गतमध्यरात्रौ काकीनाडा-नगरस्य दक्षिणदिशि, नरसापुरं निकषा, मछलीपट्टणं-कलिङ्गपट्टणं-नगरयोः मध्ये प्राप्यमानः मोन्था-चक्रवातः इदानीं गभीर-अवसादरूपेण दुर्बलः अभवत्। इदानीं भद्राचलमित्-नगरात् दक्षिण-दक्षिणपूर्वदिशि प्रायः पञ्चाशत् किलोमीटर्-परिमिते दूरे तटीय-आन्ध्रप्रदेशे समीपस्थे तेलङ्गाना-प्रदेशे च केन्द्रितम् अस्ति, अग्रिमसप्ताहान्तं यावत्दुर्बलतया अवसादितः भवितुम् अर्हतीति ऋतुविज्ञानविभागेन उक्तम्। आन्ध्रप्रदेश-सर्वकारः चक्रवातप्रभावितप्रदेशेषु सामान्यजीवनस्य पुनःस्थापनार्थं सर्वविध- आवश्यकान् उपायान् कुर्वन् अस्ति। तेलङ्गाना-राज्ये अद्य निरन्तरं द्वितीयदिवसे अपि अनेकेषु मण्डलेषु वृष्टिः जायमानास्ति ।

---------------------------------------------

<u>मैग्स्-आरम्भ</u>

सर्वकारः श्वः नवदिल्ल्यां माडल-यूथ-ग्राम-सभा इति उपक्रमस्य आरम्भं करिष्यति। अयं उपक्रमः पञ्चायतीराजमन्त्रालयस्य, शिक्षामन्त्रालयस्य, जनजातीय-कार्यमन्त्रालयस्य च संयुक्तप्रयासः अस्ति । कार्यक्रमावधौ, माडल-यूथ-ग्राम-सभा इत्यस्य प्रशिक्षण-माड्यूल् इत्येत् अपि च एम्. वाई. जी. एस्. पोर्टल् अपि अनावृत्तं भविष्यति ।

---------------------------------------------

<u>ह्युरिकन्-क्यूबाः</u>

मेलिसा-चक्रवातः अद्य क्यूबा-देशं प्रविशत्, येन पञ्चदशोत्तरैकशतं मील-प्रतिहोरामितः यावत् वायुवेगः प्रावर्तत, तथा च प्रबलतम-चक्रवात-रूपेण जमैका-देशे प्रचण्डवृष्टिः च प्रावर्तत । यू. एस्. (U.S.) राष्ट्रिय-चक्रवात-केन्द्रस्य अनुसारं मेलिसा एकः अत्यंतभीषणः चक्रवातः अस्ति यः द्वीपस्य दक्षिण-तटस्थिते सैंटियागो-डे-क्यूबा इत्यस्मिन् प्रांते प्रवेशात् पूर्वं तृतीयश्रेण्याः चक्रवातरूपेण शैथिल्यम् अवाप्नोत् ।

-----------------------------------------------

क्रेकेट्-वर्षा

पुरुष-क्रिकेट्-क्रीडायां, केनबेरा-नगरे भारत-आस्ट्रेलिया-देशयोर्मध्ये पञ्च-क्रीडा-श्रृङ्खलायाः प्रथमः टी-20- इत्याख्या अन्ताराष्ट्रिय-क्रीडा अविरामवृष्ट्या स्थगिता। प्रथमशः क्रीडता भारतेन नव संख्यकेषु ओवराख्ये कन्दुकक्षेपकचक्रेषु एकस्य क्रीडकस्य हानौ सप्तनवतिधावनाङ्काः रचिताः आसन्।

-----------------------------------------------

प्रधानमंत्री-जापानप्रधानमंत्री

प्रधानमंत्री नरेंद्रमोदी अद्य जापानस्य नवनिर्वाचितया प्रधानमन्त्रिणा साने-ताकाइची इत्यनया सह दूरभाषमाध्यमेन वार्ताम् अकरोत् । श्रीमोदी तस्यै पदभारग्रहणं कर्तुं वर्धापनं प्रायच्छत् सहैव आर्थिकसुरक्षायां, रक्षासहयोगे , प्रतिभा-गतिशीलतायां च ध्यानं केंद्रितं कुर्वन् भारत-जापानयोर्मध्ये विशिष्ट-रणनीतिं वैश्विकसहयोगं च अग्रे नेतुं पारस्परिकदृष्टिकोणम् अधिकृत्य तया सह चर्चाम् अकरोत् । एकस्मिन् सामाजिक-सञ्जालसंदेशे , श्रीमोदी अकथयत् यत् द्वावेव देशौ अस्मिन् विषये सहमतौ स्तः यत् वैश्विकशान्त्यै , स्थिरतायै, समृद्ध्यै च भारत-जापानयोर्मध्ये सम्बन्धाः सुदृढाः सन्ति ।

-----------------------------------------------

इज़राइल-गाजा-प्रहारः

गाज़ाक्षेत्रे इज्रैलदेशेन कृतानां वायवीय-प्रहाराणां एकस्यां श्रृंखलायां न्यूनातिन्यूनं त्रयस्त्रिंशत्-संख्याकाः फ़िलिस्तीन-नागरिकाः मारिताः । इज्रैलदेशस्य रक्षा-मंत्री इज़राइल-काट्ज़ इत्यसौ गाज़ाक्षेत्रे इज्रैल-सैनिकेषु प्रहारस्य, मृतक-बंधकानां शवप्रत्यावर्तनस्य नियमानाम् च उल्लंघनं कर्तुं हमासं विरुध्य आरोपं प्रख्यापितवान् । हमासः अस्य आरोपस्य खंडनम् अकरोत् ।

॥ इति वार्ताः ॥